Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १८६
नवेम्बर - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### भूषणैः किं प्रयोजनम् ?

वयं लोके बहुविधान् जनान् पश्यामः । तेषु केचन दर्शनेन कुरूपाः विद्यन्ते, केचन सुन्दराः वा । केचन कुरूपाः सन्तोऽपि अस्माकं चित्तं हर्तुं शक्नुवन्ति । ततो विपरीतम् अपि घटते । केचन दर्शनेन सुन्दराः जनाः अपि चित्तहरणे नितरां निष्फलाः भवन्ति । एवं किमर्थं स्यात् ? वस्तुतः आर्जवं (सरलता) मनुष्यस्य सौन्दर्यवर्धने उपकारकं भवति । शरीरसौष्ठवं दैवयत्तं वर्तते । अर्थात् सुन्दरं शरीरं भगवत्कृपया लभ्यते । आर्जवं मनुष्येण स्वयं सम्पादितः गुणविशेषः अस्ति । एषः गुणः इतरजनान् जेतुं शक्नोति । प्रस्तुते अर्थे सुन्दराः मनुष्याः सर्वत्र प्रकाशन्ते । शरीरेण कुरूपोऽपि सेवकः स्वामिनि प्रभावं जनयितुं शक्नोति । सेवकस्य सत्यमण्डिता वाणी स्वामिनम् आकर्षति । भवतु नाम सेवकस्य नेत्रं मनोहरं नास्ति, परन्तु तत्र विद्यमाना सरलता मनोहारिणी अस्ति । तां सुज्ञः स्वामी पठितुं शक्नोति ।

वयं समाजे बहुत्र (स्त्रीपुरुषयोः) कुरूपं युगलं पश्यामः । सुन्दरस्य पुरुषस्य पत्नी कुरूपा दृश्यते । अथवा कस्याश्चित् रूपवत्याः पतिः कुबेरः इव कुरूपः भवति । वयं तथागतं विलोक्य चिन्तयामः यत् ब्रह्मा दोषम् अन्यायं वा कृतवान् । सः केन सह किं योजितवान् ? वयं समीपं गत्वा परीक्षणं कुर्मश्चेत् किमपि भिन्नमेव अनुभवामः । तस्मिन् विषमे युगलेऽपि प्रसन्नतायाः उत्सवाः दृश्यन्ते । कारणम् ? साधारणः मनुष्यः केवलं बाह्यं सौन्दर्यम् अवलोकयति । सः आन्तरिकं सौन्दर्यं प्रति कदापि न विचारयति । यत् दाम्पत्यस्य परमं दिव्यं सत्त्वम् अस्ति, तस्य एव उपेक्षा ! लोके अनुश्रूयते यत् पञ्चाशद्वर्षीयेण पुरुषेण सह विंशतिवर्षीया युवती विवाहं कृतवती । एतां घटनां वयं केवलं सरोषं निन्दितुं शक्नुमः । परन्तु तत्र निम्नम् अवतीर्य तत्त्वं विज्ञातुं प्रयत्नं न कुर्मः । यत् सौन्दर्यवैभवं युवती द्रष्टुं शक्नोति, तत् सामान्यः जनः द्रष्टुं न शक्नोति । कामजन्यात् सुखात् अपि किमपि दिव्यतरं सुखं भवितुमर्हति इति लोकः स्वीकर्तुं न शक्नोति ।

कवयः, वक्तारः, चलचित्राणां निर्मातारः वा शारीरं सौन्दर्यं प्रति सदैव पक्षपातं कुर्वन्तः दृश्यन्ते । तदनुकुर्वाणः लोकोऽपि आन्तरिकं सौन्दर्यं प्रति उदासीनः भवति । अत्र बाह्यं सौन्दर्यं निन्दनीयम् इति आशयः नास्ति । तथापि सर्वविधा सामाजिकी व्यवस्था आन्तरिकं सौन्दर्यम् अनु जीवति इति न विस्मर्तव्यम् । यथा हि 'चन्द्रमुखी' अपि कलहप्रिया स्त्री कुरूपा दृश्यते । अन्यत्र वत्सला महिला कुरूपा भवति चेदपि शोभते । बहुषु गृहेषु सुन्दरी गृहिणी पुरुषे आकर्षणं जनयितुं न शक्नोति, परन्तु काचित् कुरूपा सेविका तत् कर्तुं प्रभवति ! कारणं मृगयितव्यम् ।

स्त्रियः विविधानाम् आभूषणानां संग्रहे नितरां रुचिं धारयन्ति । कारणं स्पष्टम् अस्ति । तत् निन्दापात्रम् अपि नास्ति । किन्तु तत्त्वतः पुरुषाः आभूषणानि न पश्यन्ति । ते तु ग्रीवायाः किञ्चित् उपरि प्रकाशमानं सरलं स्मितं पश्यन्ति । एतावत् ज्ञातं चेत् भूषणैः किं प्रयोजनम् ?

## स्वप्नस्य तात्पर्यम्



शिवरामः लक्ष्मीपुरग्रामस्य निवासी । सः धनिककुले जातः । बाल्ये एव सः मातापितृवियोगं प्राप्तवान् आसीत् । अतः पितामही एव तम् अतिप्रेम्णा पोषितवती । तस्मात् बाल्यात् एव सः अलसः असत्प्रवृत्तिकः च संवृत्तः । कृषिकार्यादिषु आसक्तिः न दर्शिता तेन । तादृशानि कार्याणि कर्मकराधीनानि कृत्वा ग्रामे वृथा अटति स्म सः ।

कदाचित् अमावास्यादिने भोजनं कृत्वा सुखेन शयितवान् सः कञ्चित् विलक्षणं स्वप्नं दृष्टवान् ।

स्वप्ने तेन दुर्गामन्दिरस्य पुरतः किञ्चिन सिंहासनं दृष्टम् । सिंहासने आत्मनः उपवेशनम् अपि दृष्टम् । तस्य शिरसि कश्चन उलूकः उपविष्टः दृष्टः । ग्रामजनाः दुर्गापूजां परित्यज्य तमेव पूजयन्तः, नैवेद्यं समर्पयन्तः चापि दृष्टाः । दूरे स्थितः कश्चन शुनकः तं दृष्ट्वा भषन् दृष्टः !

एतदनन्तरं शिवरामः जागरितः जातः । सः तं स्वप्नं विस्मर्तुं न शक्तवान् । सः पितामहीं स्वप्नस्य तात्पर्यं पृष्टवान् । तदा पितामही उक्तवती – "अये शिव ! स्वप्नाः देवरहस्यानि इति निर्दिश्यन्ते । तेषां तात्पर्यम् अस्मदादिभिः न अवगम्यते । अस्माकं ग्रामस्य मुख्यः हरिनारायणः स्वप्नफलकथने निपुणः । सः पृष्टः चेत् स्वप्नस्य तात्पर्यं सम्यक् ज्ञायेत" इति ।

शिवरामः हरिनारायणं दृष्ट्वा स्वप्नवृत्तान्तं विस्तरेण तम् उक्तवान् । तदा हरिनारायणः अवदत् – "भवान् आत्मानं श्रेष्ठं मन्यते तस्य परिणामतः भवता एतादृशः स्वप्नः दृष्टः इति ।"

एतत् श्रुत्वा शिवरामः अवदत् – "अहं कदापि आत्मानं श्रेष्ठं न भावितवान् । अहं देवतातुल्यः अस्मि इति भावः मयि कदापि न आगतः एव । तथापि भवदुक्तं युक्तम् इत्येव मन्येत चेदपि शुनकः किमर्थं भषति स्म, उलूकः किमर्थं शिरसि उपविशति स्म इति तु प्रश्नः अनुत्तरितः एव तिष्ठति !" इति ।

हरिनारायणः किञ्चित् विचिन्त्य अवदत् – "प्रतिवेशिग्रामे वसन् श्रीधरः स्वप्नफलविषयकाणां ग्रन्थानाम् अध्ययनं कृतवान् अस्ति । सः प्रष्टव्यः एतद्विषये" इति ।

शिवः श्रीधरेण मिलित्वा स्वप्नवृत्तान्तं निवेद्य स्वस्य प्रश्नान् अपृच्छत् । तदा श्रीधरः अवदत् – "भवतः ग्रामस्य महती हानिः भविष्यति । अतः एव ग्रामजनाः देवीपूजां परित्यज्य भवतः पूजां कर्तुम् उद्युक्ताः सन्ति" इति ।

एतेन उत्तरेण शिवरामः न सन्तुष्टः । सः अपृच्छत् – ''एवं तर्हि शुनकभषणस्य, उलूकदर्शनस्य च तात्पर्यं किम् ?'' इति

''शुनकः तु बुभुक्षितः आसीत् । अतः तेन भषणं कृतम् । जनाः देवीपूजां परित्यज्य भवतः पूजां यत् कर्तुम् उद्युक्ताः तत् अनिष्टकारकम् । तस्य ज्ञापनाय उलूकः भवतः शिरसि उपविष्टः दृष्टः'' इति उक्तवान् श्रीधरः ।

एतदनन्तरं शिवरामः ततः प्रस्थितवान् । स्वग्रामं प्राप्य श्रान्तिपरिहाराय सः कस्यचित् वृक्षस्य अधः उपविष्टवान् । तदा पार्श्वे एव उपविष्टः विरागी तम् अपृच्छत् – ''अये शिवराम ! एषु दिनेषु भवान् न दृष्टः एव ! क्व गतम् आसीत् भवता ?'' इति ।

जनाः तं विरागिणम् उन्मत्तं भावयन्तः पदे पदे हसन्ति स्म । शिवरामः अपि एतत् जानाति स्म एव । सः विरागिणम् अवदत् – ''मया कश्चन विलक्षणः स्वप्नः दृष्टः । तस्य तात्पर्यस्य अवगमनाय मया ग्रामान्तरं गतम् आसीत्'' इति ।

तदा विरागी हसन् अवदत् – ''कोऽपि तस्य तात्पर्यं समीचीनतया उक्तवान् न स्यात् खलु !'' इति ।

''युक्तम् एव उक्तं भवता । कोऽपि तस्य तात्पर्यं योग्येन क्रमेण न उक्तवान् इति तु सत्यम् एव । किन्तु एतत् कथं ज्ञातं भवता ?'' इति आश्चर्येण अपृच्छत् शिवरामः ।

''अये मूर्ख ! भवतः स्वप्नस्य तात्पर्यं वक्तुं समर्थः एकः एव अस्ति लोके । स च अहम् एव'' इति उच्चैः हसन् अवदत् विरागी । शिवरामः स्वस्य स्वप्नस्य पूर्णं विवरणं दत्तवान् ।

तदा विरागी उच्चैः हसन् उक्तवान् – ''जनेषु देवभक्तिः दिने दिने क्षीयमाणा अस्ति । जनेषु स्वार्थबुद्धिः आलस्यं च वर्धमानम् अस्ति । एतस्य एव प्रत्यक्षम् उदाहरणम् अस्ति – परमालसस्य भवतः पूजाकरणम् । सुवर्णसिंहासनं यत् दृष्टं तत् तु भवतः दुराशायाः द्योतकम्'' इति ।

''शुनकः किमर्थम् अभषत् ? उलूकः मम शिरसि किमर्थम् उपाविशत् ?'' इति अपृच्छत् शिवरामः ।

तदा विरागी अवदत् – ''भवतः पितामही प्रतिदिनं भवन्तं, तं शुनकं चापि भोजयति । भवान् क्षेत्रे कार्यम् अकुर्वन् ग्रामे वृथा अटन् कालं यापयति इत्यतः शुनकः भवति घृणां प्रदर्शयति । तदर्थम् एव सः भवन्तं दृष्ट्वा भषति । उलूकः सर्वदा अन्धकारप्रियः । भवान् परमालसः इत्यतः अज्ञानान्धकारे निमग्नः । अतः एव उलूकः प्रीत्या भवतः शिरसि उपविष्टवान्'' इति ।

''श्रीमन् ! भवान् महाज्ञानी एव । जनाः भवन्तम् उन्मत्तं भावयन्ति यत् तत् तेषाम् अज्ञानं दर्शयति । भवतः बोधनतः मयि ज्ञानम् उदितम् अस्ति'' इति अवदत् शिवरामः ।

ततः प्रस्थातुम् उद्युक्तस्य शिवरामस्य गमनं स्थगयन् विरागी – ''समग्रः ग्रामः एव माम् उन्मत्तं भावयति । मां तादृशम् अभावयन् भवान् कीदृशः महापुरुषः ! गच्छ रे गच्छ । एतस्मिन् ग्रामे अहमपि स्थातुं न इच्छामि'' इति वदन् उच्चैः हसन् ततः निर्गतवान् ।

## सुभाषितानां मनुष्य-व्यक्तित्व-विकासे प्रभावः

व्योम शाहः

**पितृवचनतो नास्ति गुरोरादेशतोऽपि च ।**
**यः प्रभावोऽस्त्यनेनैव सुभाषितलवेन हि ॥**

जगत्यस्मिन् यादृशः प्रभावः गरीयस्या गुरोः आज्ञया नास्ति, श्रेयसा पितृवचसा अपि यद् न सम्भवति, मातुः उपदेशेन अपि यद् न सिध्यति, तत् एकेन एव सुभाषितलवमात्रेण सिद्धीभवितुं शक्यते। ननु अनेन मनः विचारपथम् आयाति यद् एकेन एव श्लोकेन कथम् ईदृशः प्रभावः भवति ? यथा पिप्पिलिकायाः गजकर्णगमनं हस्तिनः नृत्यस्य हेतुः, यथा एकः एव विषाणुः रोगिणः रोगस्य हेतुः, यथा एका एव औषधसूचिः रोगनिवारणस्य हेतुः, तथैव एकमेव सुभाषितं मनुष्यजीवने परिवर्तनस्य हेतुः भवितुम् अर्हति।

मनुष्यस्य व्यक्तित्वे सुभाषितानां प्रभावस्य उदाहरणं साक्षाद् अस्मासु एव वर्तते। तस्य अभिधानम् अपि अस्माभिः बहुशः व्यवहारिके जीवने श्रुतम्। अस्य ग्रन्थस्य नाम पण्डित-विष्णुशर्मणा रचितं पञ्चतन्त्रम्। पञ्चतन्त्रम् इति महान् कथासङ्ग्रहः वर्तते। किन्तु अस्य कथासङ्ग्रहस्य महत्तरः पद्यविभागः सुभाषितैः एव व्याप्तः। कथानां बोधैः राजपुत्रेभ्यः बोधित्वं प्राप्तं किन्तु एषां सुभाषितानां तेषां कु माराणां मानस-पटे महान् प्रभावः। बोधस्तु कथासमाप्तौ प्राप्यते परं सुभाषितानि तु पदे पदे अवबोधयन्ति। तत् पञ्चतन्त्रं स्याद् वा हितोपदेशः वा स्याद् - तेषु स्थितानां कथानां प्रयोजनं मूढाज्ञावबोधनम्। किन्तु तेषु ग्रथितानां सुभाषितानां प्रयोजनं बुधावबोधनम्।

बुधाः तु सर्वलोकमान्याः सार्वलौकिकाः। प्रायः लोकेऽपि इयं भावना प्रवहति यद् गुरुं विहाय कश्चिद् अपि बुधम् उपदेष्टुं न अर्हति। अतः यदा बुधाः तेषां ध्येयाद् विचलन्ति तेषां च गुरुः पारेलोकं गतश्चेत् कस्तान् पुनः सुपथम् आरोपयेत् ? इति विषयीभूते सुभाषितम् अमोघशस्त्ररूपेण विराजते। यथाऽऽदौ अपि प्रोक्तं यद् यत् परिवर्तनं गुरुपितॄणाम् आज्ञोपदेशाभ्यां न सिध्यति तत् सुभाषित-लव-मात्रेण सेद्धुं शक्यम्।

लोकेऽत्र बहुभिः जनैः ज्ञायते यद् यत्र यस्य वस्तुनः अभियाचना अधिका तत्रैव प्रायः तस्य स्रवणम् अभ्यधिकम्। संस्कृत-साहित्य-रत्न-कण्ठाभरणे आलङ्कारिकाः प्रयोगाः पद-लालित्यं च शोभन्ते एव तथापि तेषु अंशमात्रेण स्थितानि सुभाषितानि भ्राजन्ते एव इति नास्ति संशय-विषयः। संस्कृत-साहित्ये बहवः सौभाषिताः ग्रन्थाः उपलभ्यन्ते। ग्रन्थेभ्यो प्यधिकाः सुभाषित-सङ्ग्रहाः लभ्यन्ते येषु विविधेभ्यः साहित्यादि-ग्रन्थेभ्यः उद्धृतानां सुभाषितश्लोकानां सुभाषित-पदानां वा सङ्कलनं प्राप्यते। यथा वित्तकार्ये विशारदाः प्रायः अयोग्ये स्थाने स्वकं वित्तं नार्पयन्ति तथैव साहित्यादि-कवित्वशैलीषु विशारदाः क्वचिदपि अप्रयोजकं न लिखन्ति। सुभाषितेऽपि तथैव उच्यते 'नामूलं लिख्यते किञ्चिद्।' अतः अनेन प्रमाणीक्रियते यत् सुभाषितानां सूक्तीनां वा मनुष्य-जीवने प्रभावः अस्ति एव। अन्यथा कवयः तेषु साहित्येषु कालं न यापयेयुः। व्यासकृद्भ्यः पुराणेभ्यः आरभ्य भावप्रकाश-पङ्कजाभ्यां कृतां अभिनवसुभाषितावलिं यावत् सूक्तयः सम्प्राप्यन्ते। एताः सूक्तयः सुभाषितानि वा मार्गाद् विचलितान् मनुष्यान् पुनः मार्गम् आरोपयन्ति। संस्कृत-साहित्ये स्वैराणि सुभाषितानि, सुभाषितानां सङ्ग्रहः, अपि च विविधेषु नाट्य-महाकाव्य-चम्प्वादि-साहित्याकरेषु सुभाषित-लवाः उपलभ्यन्ते।

**(क्रमशः... )**

# मासवार्ता

## आयोजितानि व्याख्यानानि

संस्कृतरसिकाः संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयुः इति विचार्य एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनम् अभवत्। कार्यक्रमेऽस्मिन् ऑक्टोबरमासस्य २ दिनाङ्के डॉ. चिन्तनः दवे 'संस्कृत में छंदो का स्वरूप' इति विषये, ऑक्टोबरमासस्य ९ दिनाङ्के डॉ. कमलेशः चोकसीमहोदयः 'प्रसिद्ध संस्कृतशब्दकोष-अमरकोष का परिचय' इति विषये, ऑक्टोबरमासस्य १३ दिनाङ्के डॉ. वसन्तकुमारः भट्टः 'ऋग्वेद में स्वतन्त्र स्वरित एवं उसके भेद' इति विषये च मनोहरं व्याख्यानं प्रायच्छन्। व्याख्यानानि श्रुत्वा संस्कृतरसिकाः सन्तुष्टाः आसन्।

## आरब्धः 'Diploma in Sanskrit Teaching' अभ्यासक्रमः




संस्कृतमाध्यमेन संस्कृतं पाठयितुं समर्थानां शिक्षकानां प्रशिक्षणाय एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं 'Diploma in Sanskrit Teaching' इति अभ्यासक्रमं सञ्चालयति । एतस्मिन् वर्षेऽपि ऑक्टोबरमासे अभ्यासक्रमोऽयम् आरब्धः वर्तते । २१ छात्राः अभ्यासक्रमेऽस्मिन् प्रवेशं स्वीकृतवन्तः । अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह संलग्नः वर्तते । जुलाईमासपर्यन्तं छात्राः संस्कृतशिक्षकप्रशिक्षणं स्वीकरिष्यन्ति।

## सम्पन्नः Virtual संस्कृतगरबा कार्यक्रमः

संस्कृतभाषायाः प्रचाराय एकलव्य-संस्कृत-एकेडेमीसंस्थानं प्रतिवर्षं संस्कृतगरबाकार्यक्रमस्य आयोजनं करोति । एतस्मिन् वर्षेऽपि ऑक्टोबरमासस्य ७,८ दिनाङ्कयोः 'Virtual संस्कृतगरबा' कार्यक्रमस्य आयोजनम् अभवत्। कार्यक्रमेऽस्मिन् ७ दिनाङ्के श्रीधवलकुमारः, ८ दिनाङ्के सुश्री धैर्या मांकड च संस्कृतगरबागीतानि गीत्वा, भाषान्तरस्य विषये, गरबागीतानां सिद्धतायाः विषये च चर्चाम् अकुरुताम्। कार्यक्रमस्य अस्य सङ्कलनं डॉ. मिहिरः उपाध्यायः, श्रीश्यामः पटेलः, श्रीमती भावना रावलः च अकुर्वन्। कार्यक्रमोऽयं संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, एकलव्य-संस्कृत-एकेडेमी, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण आयोजितः आसीत्।

## कृपया हसन्तु

शिक्षकः - (रमणम् उद्दिश्य) भोः रमण ! यदि शतं पात्राणि प्रक्षालयितुम् एकस्य सेवकस्य एकघण्टात्मकः कालः गच्छति तर्हि तानि शतं पात्राणि प्रक्षालयितुं द्वयोः सेवकयोः कियान् कालः गमिष्यति ?

रमणः - महोदय ! पूर्वं कथयतु यत् तौ कौ द्वौ मूर्खौ स्तः याभ्यां प्रक्षालितानि पात्राणि पुनः प्रक्षालितानि ?

★ ★ ★ ★ ★

कश्चन पुरुषः केनचित् बालकेन सह केशकर्तनाय नापितस्य आपणम् अगच्छत् । तत्र गत्वा आदौ सः तस्य केशान् अकर्तयत् । ततः सः नापितम् अवदत् - "भोः ! एषः मम पुत्रः अस्ति । एतस्यापि केशान् भवान् सम्यक् कर्तयतु, तावता अहं ताम्बूलं खादित्वा आगच्छामि" इति ।

नापितः बालकस्य केशान् कर्तयित्वा तस्य पुरुषस्य प्रतिक्षाम् अकरोत् । किन्तु यदा सः पुरुषः न आगतः तदा नापितः बालकम् अपृच्छत् - "भोः ! तव पिता इदानीमपि किमर्थं न आगतः ? सः कुत्र गतः इति त्वं जानासि ?"

तदा बालकः अवदत् - "महोदय ! सः मम पिता न आसीत् । अहं तु मार्गे क्रीडन् आसम् । सः मां दृष्ट्वा अवदत् - भोः बालक ! यदि धनेन विना केशान् कर्तयितुम् इच्छसि तर्हि मया सह आगच्छ" इति ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**वेपथुर्मलिनं वक्त्रं दीना वाग्गद्गदः स्वरः ।**
**मरणे यानि चिह्नानि तानि चिह्नानि याचके ॥**

**तात्पर्यम्** – शरीरे कम्पनं, मुखे म्लानता, वचसि दैन्यं स्वरे गद्गदता (भयेन कम्पनम्) इत्येतानि लक्षणानि मरणे भवन्ति। तानि एव लक्षणानि याचकेऽपि भवन्ति।

**ऋणशेषश्चाग्निशेषः शत्रुशेषस्तथैव च ।**
**पुनः पुनः प्रवर्तन्ते तस्माच्छेषं न रक्षयेत् ॥**

**तात्पर्यम्** – मनुष्येण दातव्यं यत् ऋणम् अस्ति तत् किञ्चिदपि न अवशेषयेत्, अर्थात् सम्पूर्णं ऋणं प्रत्यर्पयेत्। अग्नेः किञ्चिदपि शेषं न अवशेषयेत्। तथा च युद्धक्षेत्रे एकम् अपि शत्रुं न अवशेषयेत्। यतः अवशिष्टाः एते त्रयः पुनः पुनः वर्धमानाः भवन्ति।

**एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते ।**
**सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः ॥**

**तात्पर्यम्** – विषरसः तत् पीतवन्तं हन्ति, शस्त्रेण विद्धः जनः एव मरणं प्राप्नोति । किन्तु राज्ञः मन्त्रालोचनस्य क्रमः दुष्टः यदि भवेत् तर्हि तस्मात् न केवलं राजा अपि च राष्ट्रमेव विनष्टं भविष्यति।

## ज्ञानसरिता

श्यामः पटेलः



**महाकायः करियादः** – स्थलचरजीवजन्तुषु गजात् गण्डात् च परं तृतीयः महाकायः प्राणी अस्ति करियादः । एते त्रयः महाकायप्राणिनः शाकाहारं तृणाहारमेव कुर्वन्ति । परिपीवरं बृहत्-शरीरं तथा लघवः पादाः करियादस्य परिचयचिह्नानि । करियादस्य प्रत्येकस्मिन् पादे चतस्रः अङ्गुल्यः भवन्ति । किन्तु तासां रूपम् अङ्गुष्ठः इव । चतुर्णां पादानां चतुर्भिः अङ्गुष्ठैः करियादस्य शरीरभारः चतुर्षु पादेषु संविभागीभवति । करियादाः १० फीटपरिमिततः १२ फीटपरिमितपर्यन्तं दीर्घाः तथा च ०५ फीटपरिमितं यावत् उन्नताः च भवन्ति । ते औष्ण्यात् स्वात्मानं रक्षितुं जले एव निमग्नाः भवन्ति । किन्तु तत्रापि तेषां नासिका नेत्रे च जलात् बहिः एव भवन्ति । करियादस्य शरीरभारः केवलं ०३ टनपरिमितः एव ! कियान् कृशः करियादः ! करियादः आक्रमकः युद्धप्रियश्च प्राणी अस्ति । युद्धावसरे सः क्षुतं कुर्वन् उच्चैः रोरूयते । तस्य जम्भयोः बहु विस्तारः भवितुं शक्नोति । यद्यपि करियादस्य शरीरभारः अधिकः अस्ति तथापि वप्रस्थानं जलाशयानां तटप्रदेशं च सरलतया आरोढुं शक्नोति । करियादः आङ्ग्लभाषायां 'हिप्पोपोटेमस्' नाम्ना प्रसिद्धः । मूलतः ग्रीकभाषायाः 'हिप्पो' शब्दः अश्वार्थं प्रयुज्यते । अतः अयं प्राणी 'जलस्य अश्वः' अपि कथ्यते । करियादपोतः जन्मसमयतः एव जले तरणं कर्तुं समर्थः भवति ।

करियादः – hippopotamus, गजः – elephant, गण्डः – rhinoceros, परिपीवरः – very fat
क्षुतम् – sneeze, जम्भः – jaw, वप्रस्थानम् – slope of a hill, रोरूयते – roar loudly
पोतः – child

## शब्दमञ्जूषा

| | |
|---|---|
| **पञ्जीकारकः** | registrar |
| **पञ्जीकरणम्** | registration |
| **सम्बन्धः** | relation |
| **मुक्तः** | released |
| **पुनर्विवाहः** | remarriage |
| **उपायः** | remedy |
| **स्मृतिः** | remembrance |
| **प्रतिवेदनम्** | report |
| **निराकरणम्** | repulsion |
| **प्रार्थना** | request |
| **अपेक्षितवस्तुजातम्** | requisite |
| **आवासः** | residence |
| **प्रस्तावः** | resolution |
| **शरणम्** | resort |
| **उत्तरदायित्वम्** | responsibility |

## किं भवन्तः जानन्ति ?

**१ ) सूर्यस्य सम्बन्धः कया तिथ्या सह वर्तते ?**

(क) पञ्चम्या (ख) षष्ठ्या (ग) सप्तम्या (घ) अष्टम्या

**२ ) दुर्गायाः सम्बन्धः कया तिथ्या सह वर्तते ?**

(क) नवम्या (ख) दशम्या (ग) एकादश्या (घ) द्वादश्या

**३ ) विष्णोः सम्बन्धः एतासु कया तिथ्या सह वर्तते ?**

(क) द्वादश्या (ख) त्रयोदश्या (ग) चतुर्दश्या (घ) पूर्णिमया

**४ ) शिवस्य सम्बन्धः कया तिथ्या सह वर्तते ?**

(क) दशम्या (ख) एकादश्या (ग) त्रयोदश्या (घ) चतुर्दश्या

**५ ) चन्द्रमसः सम्बन्धः कया सह वर्तते ?**

(क) द्वादश्या (ख) त्रयोदश्या (ग) चतुर्दश्या (घ) पूर्णिमया

**६ ) पितृणां सम्बन्धः कया तिथ्या सह वर्तते ?**

(क) पञ्चम्या (ख) तृतीयया (ग) अष्टम्या (घ) अमावस्यया

**७ ) वसूनां सम्बन्धः कया तिथ्या सह वर्तते ?**

(क) नवम्या (ख) अष्टम्या (ग) सप्तम्या (घ) दशम्या

उत्तराणि – (१) ग (२) क (३) क (४) घ (५) घ (६) घ (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Learn Online**

Value Education Through Sanskrit in

## बालसंस्कारकेन्द्रम्

(Class 4 to 6)

## बालसंस्कृतकेन्द्रम्

(Class 7 & 8)

**Date :** 20/11/21 to 16/04/22
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 3500/-

➤ **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First level**

**Date :** 1/12/21 to 28/2/22
**Day :** Mon-Wed-Fri
**Time :** 7:30 am to 9:00 am (IST)
**Fees :** 5000/-

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**Fourth level**

**Date :** 1/12/21 to 28/2/22
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 6000/-

## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

## दीपावलीवर्गः

**Sanskrit Grammer (Cl 9 & 10)**

**Date :** 8/11/21 to 18/11/21
**Day :** Daily
**Time :** 9:00 am to 10:30 am (IST)
**Fees :** 2500/-

**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006